শ্ৰীঃ

শ্ৰীমতে রামানুজায নমঃ

শ্ৰীমতে নিগমান্তমহাদেশিকায নমঃ

শ্ৰীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্ৰীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্ৰীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে কিষ্কিন্ধাকাণ্ডে

# ॥ পঞ্চষষ্টিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্ৰী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ পঞ্চষষ্টিতমঃ সর্গঃ ॥

## পর্যাযেণ ৱানরৈঃ স্বস্বদূরগমনশক্তিপরিমাণস্য প্রতিপাদনং জাম্বৱদঙ্গদযোঃ সংলাপো জাম্বৱতো হনুমন্তং প্রেরযিতুং তৎপার্শ্ৱে গমনম্

অথাঙ্গদৱচঃ শ্রুৎৱা তে সর্ৱে ৱানরর্ষভাঃ।
স্বং স্বং গতৌ সমুৎসাহমূচুস্তত্র যথাক্রমম্॥ **4.65.1** ॥

গজো গৱাক্ষো গৱযঃ শরভো গন্ধমাদনঃ।
মৈন্দশ্চ দ্ৱিৱিদশ্চৈৱ সুষেণো জাম্বৱাংস্তথা॥ **4.65.2** ॥

আবভাষে গজস্তত্র প্লৱেযং দশযোজনম্।
গৱাক্ষো যোজনান্যাহ গমিষ্যামীতি ৱিংশতিম্॥ **4.65.3** ॥

শরভো ৱানরস্তত্র ৱানরাংস্তানুৱাচ হ।
ত্রিংশতং তু গমিষ্যামি যোজনানাং প্লৱঙ্গমাঃ॥ **4.65.4** ॥

ঋষভো ৱানরস্তত্র ৱানরাংস্তানুৱাচ হ।
চৎৱারিংশদ্ গমিষ্যামি যোজনানাং ন সংশযঃ॥ **4.65.5** ॥

ৱানরাংস্তু মহাতেজা অব্রৱীদ্ গন্ধমাদনঃ।
যোজনানাং গমিষ্যামি পঞ্চাশত্তু ন সংশযঃ॥ **4.65.6** ॥

মৈন্দস্তু ৱানরস্তত্র ৱানরাংস্তানুৱাচ হ।
যোজনানাং পরং ষষ্টিমহং প্লৱিতুমুৎসহে॥ **4.65.7** ॥

ততস্তত্র মহাতেজা দ্বিৱিদঃ প্রত্যভাষত।
গমিষ্যামি ন সন্দেহঃ সপ্ততিং যোজনান্যহম্॥ **4.65.8** ॥

সুষেণস্তু মহাতেজাঃ সত্ত্ৱৱান্ কপিসত্তমঃ।
অশীতিং প্রতিজানেঽহং যোজনানাং পরাক্রমে॥ **4.65.9** ॥

তেষাং কথযতাং তত্র সর্ৱাংস্তাননুমান্য চ।
ততো ৱৃদ্ধতমস্তেষাং জাম্বৱান্ প্রত্যভাষত॥ **4.65.10** ॥

পূর্ৱমস্মাকমপ্যাসীৎ কশ্চিদ্ গতিপরাক্রমঃ।
তে ৱযং ৱযসঃ পারমনুপ্রাপ্তাঃ স্ম সাম্প্রতম্॥ **4.65.11** ॥

কিং তু নৈৱং গতে শক্যমিদং কার্যমুপেক্ষিতুম্।
যদর্থং কপিরাজশ্চ রামশ্চ কৃতনিশ্চযৌ॥ **4.65.12** ॥

সাম্প্রতং কালমস্মাকং যা গতিস্তাং নিবোধত।
নৱতিং যোজনানাং তু গমিষ্যামি ন সংশযঃ॥ **4.65.13** ॥

তাংশ্চ সর্ৱান্ হরিশ্রেষ্ঠাঞ্জাম্বৱানিদমব্রৱীৎ।
ন খল্ৱেতাৱদেৱাসীদ্ গমনে মে পরাক্রমঃ॥ **4.65.14** ॥

মযা ৱৈরোচনে যজ্ঞে প্রভৱিষ্ণুঃ সনাতনঃ।
প্রদক্ষিণীকৃতঃ পূর্ৱং ক্রমমাণস্ত্রিৱিক্রমম্॥ **4.65.15** ॥

স ইদানীমহং ৱৃদ্ধঃ প্লৱনে মন্দৱিক্রমঃ।
যৌৱনে চ তদাসীন্মে বলমপ্রতিমং পরম্॥ **4.65.16** ॥

সম্প্রত্যেতাৱদেৱাদ্য শক্যং মে গমনে স্ৱতঃ।
নৈতাৱতা চ সংসিদ্ধিঃ কার্যস্যাস্য ভৱিষ্যতি॥ **4.65.17** ॥

অথোত্তরমুদারার্থমব্রৱীদঙ্গদস্তদা।
অনুমান্য তদা প্রাজ্ঞো জাম্বৱন্তং মহাকপিঃ॥ **4.65.18** ॥

অহমেতদ্ গমিষ্যামি যোজনানাং শতং মহৎ।
নিৱর্তনে তু মে শক্তিঃ স্যান্ন ৱেতি ন নিশ্চিতম্॥ **4.65.19** ॥

তমুৱাচ হরিশ্রেষ্ঠং জাম্বৱান্ ৱাক্যকোৱিদঃ।
জ্ঞাযতে গমনে শক্তিস্তৱ হর্যৃক্ষসত্তম॥ **4.65.20** ॥

কামং শতসহস্রং ৱা নহ্যেষ ৱিধিরুচ্যতে।
যোজনানাং ভৱাঞ্শক্তো গন্তুং প্রতিনিৱর্তিতুম্॥ **4.65.21** ॥

নহি প্রেষযিতা তাত স্বামী প্রেষ্যঃ কথঞ্চন।
ভৱতাযং জনঃ সর্ৱঃ প্রেষ্যঃ প্লৱগসত্তম॥ **4.65.22** ॥

ভৱান্ কলত্রমস্মাকং স্বামিভাৱে ৱ্যৱস্থিতঃ।
স্বামী কলত্রং সৈন্যস্য গতিরেষা পরন্তপ॥ **4.65.23** ॥

অপি ৱৈ তস্য কার্যস্য ভৱান্ মূলমরিন্দম।
তস্মাৎ কলত্রৱৎ তাত প্রতিপাল্যঃ সদা ভৱান্॥ **4.65.24** ॥

মূলমর্থস্য সংরক্ষ্যমেষ কার্যৱিদাং নযঃ।
মূলে হি সতি সিধ্যন্তি গুণাঃ সর্ৱে ফলোদযাঃ॥ **4.65.25** ॥

তদ্ ভৱানস্য কার্যস্য সাধনং সত্যৱিক্রম।
বুদ্ধিৱিক্রমসম্পন্নো হেতুরত্র পরন্তপ॥ **4.65.26** ॥

গুরুশ্চ গুরুপুত্রশ্চ ৎৱং হি নঃ কপিসত্তম।
ভৱন্তমাশ্রিত্য ৱযং সমর্থা হ্যর্থসাধনে॥ **4.65.27** ॥

উক্তৱাক্যং মহাপ্রাজ্ঞং জাম্বৱন্তং মহাকপিঃ।
প্রত্যুৱাচোত্তরং ৱাক্যং ৱালিসূনুরথাঙ্গদঃ॥ **4.65.28** ॥

যদি নাহং গমিষ্যামি নান্যো ৱানরপুঙ্গৱঃ।
পুনঃ খল্ৱিদমস্মাভিঃ কার্যং প্রাযোপৱেশনম্॥ **4.65.29** ॥

নহ্যকৃৎৱা হরিপতেঃ সন্দেশং তস্য ধীমতঃ।
তত্রাপি গৎৱা প্রাণানাং ন পশ্যে পরিরক্ষণম্॥ **4.65.30**॥

স হি প্রসাদে চাত্যর্থকোপে চ হরিরীশ্ৱরঃ।
অতীত্য তস্য সন্দেশং ৱিনাশো গমনে ভৱেৎ॥ **4.65.31**॥

তত্তথা হ্যস্য কার্যস্য ন ভৱত্যন্যথা গতিঃ।
তদ্ ভৱানেৱ দৃষ্টার্থঃ সঞ্চিন্তযিতুমর্হতি॥ **4.65.32**॥

সোঽঙ্গদেন তদা ৱীরঃ প্রত্যুক্তঃ প্লৱগর্ষভঃ।
জাম্বৱানুত্তমং ৱাক্যং প্রোৱাচেদং ততোঽঙ্গদম্॥ **4.65.33**॥

তস্য তে ৱীর কার্যস্য ন কিঞ্চিৎ পরিহাস্যতে।
এষ সঞ্চোদযাম্যেনং যঃ কার্যং সাধযিষ্যতি॥ **4.65.34**॥

ততঃ প্রতীতং প্লৱতাং ৱরিষ্ঠ -
মেকান্তমাশ্রিত্য সুখোপৱিষ্টম্।
সঞ্চোদযামাস হরিপ্রৱীরো
হরিপ্রৱীরং হনুমন্তমেৱ॥ **4.65.35**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
কিষ্কিন্ধাকাণ্ডে পঞ্চষষ্টিতমঃ সর্গঃ॥